**स्वयंस्फुरणरूपत्वान्नाभास उपयुज्यते ॥**[19] इति च॥

बुद्धिवृत्तिप्रतिबिम्बितचिदाभासेन सर्ववस्तुप्रकाशो भवति। स्वयंप्रकाशमाने साक्षिणि विषये तु स्वस्यैव प्रकाशरूपत्वात् तत्त्वमस्यादिवाक्यजन्यवृत्त्यात्मकज्ञानेन ब्रह्मावरकस्य अज्ञानस्य निवर्हणमात्रमपेक्षितम्, किन्तु ब्रह्मण: स्वप्रकाशत्वात् तदवभासनार्थं चिदाभासो नापेक्ष्यत इति चिदाभासव्याप्यत्वं निराकृतम्। बुद्धिवृत्तिव्याप्यत्वं त्वावरणनिवर्तकतयोपयोगात्र निवार्यत इति भाव:।

यद्यपि घटाद्याकारवृत्तिवद् ब्रह्मगोचरवृत्तावपि चिदाभासोऽस्ति, तथापि नासौ ब्रह्मणो भेदेन भासते, किन्तु प्रचण्डातपमध्यवर्तिप्रदीपप्रभावद् एकीभूत एव भवति। अत: चिदाभासो न ब्रह्मणि स्फुरणलक्षणातिशयजनक:। यथोक्तं विद्यारण्यमुनिभि: -

**स्थितोऽप्यसौ चिदाभासो ब्रह्मण्येकीभवेत्परम्।**
**न तु ब्रह्मण्यतिशयं फलं कुर्याद्घटादिवत्॥**[20] इति।

असौ चिदाभासो बुद्धिव्याप्तौ बुद्धिविशेषणतया स्थितोऽपि ब्रह्मणि परमत्यन्तमेकीभवेत्। **"यथा नद्य: स्यन्दमाना: समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय**[21]**"** इति श्रुत्यनुसारं यथा सुविशाले सागरे पतितो वृष्टिबिन्दुर्न समुद्रजलमार्द्रं करोति किन्तु तेन सह एकीभवति, तद्वदत्रापि बोध्यम्। अत एव अज्ञातचैतन्यस्य वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वे प्रतिपिद्धे सति **"मनसैवानुद्रष्टव्यम्**[22]**"**, **"यन्मनसा न मनुते**[23]**"** इत्यनयो: श्रुत्यो: विरोधाभाव:।

अमुमेवार्थं कैवल्यदीपिकाकारा एवं विशदीचक्रु: -

**वृत्ते: फलस्य विकृतिं हृदयं वदन्ति**
**ब्रह्मातिथिर्हि मनस: फलवर्जितस्य।**
**युक्तं फलेन न हि पश्यति वस्तु चित्तं**
**ज्ञात्वार्थ ईदृश इति प्रतियाहि शान्तिम्॥**[24] इति।

किञ्च एकमन्यदपि प्रयोजनं तत्रास्ति–प्रायेण सर्वेऽपि दार्शनिका: अहमुल्लेखभाक् आत्मानं स्वीकुर्वन्ति। य: अहमहमिति उल्लिख्यमान: पदार्थो भवति स: देहादिभ्यो व्यतिरिक्त इन्द्रियेभ्य: व्यतिरिक्त: इति तु तेऽपि वदन्ति परन्तु अहमिति उल्लेखभाक् स एवात्मा, तत्रैव पर्यवस्यन्ति अन्ये दार्शनिका:। परन्तु वेदान्ते एव अयं विशेषो वर्तते यत् अहमित्यत्र अपि विवेकं कृत्वा कश्चन अंश तत्र अध्यस्तो वर्तते। अत: तत्र अध्यस्तमंश दूरीकृत्य केवलम् आत्मस्वरूपं वयं स्वीकुर्याम: एतदर्थं प्रयत्न: कृतो वर्तते। यथा अहं देहेन्द्रियादिभ्यो व्यतिरिक्तोऽस्मि। एतद्वयमन्येषु देहादिपु व्यतिरेकं द्रष्टुं प्रभवाम:, एतद्देहस्याभावेऽपि देहान्तरेण स्वप्ने व्यवहराम: इति विज्ञानात्। एतद्देहो नास्ति, तथापि व्यवहारोऽस्ति तत्र। जाग्रदवस्थायामपि बाल्ये देह एकविधो वर्तते, स्थाविरे तु अन्यविधो वर्तते। तत्र बहुभेद: वर्तते

१९ पञ्चदशी, ७/९२
२० पञ्चदशी, ७/९४
२१ मुण्डकोपनिषद्, ३/२/८
२२ बृहदारण्यकोपनिषद्, ४/४/१९
२३ केनोपनिषद्, १/६
२४ कैवल्यदीपिका २/१५



तथापि अहन्तु सैव भवामीति प्रत्यभिज्ञा वर्तते। एवञ्च आत्मा देहादिव्यतिरिक्त इति अवगन्तुं शक्यते, इन्द्रियेभ्यो व्यतिरेक इति ज्ञातुं शक्यते। किन्तु य: मनस: सकाशात् आत्मन: व्यतिरेक: तत् अत्यन्तम् अस्फुटं वर्तते। यत: व्यवहारे मम मन: चिन्तयति इत्यादिरूपेणापि व्यवहारोस्ति। अहं चिन्तयामि इत्यपि तथापि ईषद्भेद: स्फुट: भवति। अत: सुषुप्त्यवस्थया आत्मन: विवेक: भवति।

आत्मा स्वयं भासते इति वेदान्तसिद्धान्त:। तर्हि अहमिति पदार्थो एव आत्मा स्यात् तदानीं अहमिति भाव: किमपि अन्यत् प्रमाणं अनपेक्ष्यैव भवति इति वक्तव्यम्। तथा सति सुषुप्ते: अहमिति भासेत। छान्दोग्योपनिषत् कथयति–**"नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति**[25]**"** इति न जानाति। तत् कुतो न जानाति? तदा उच्यते–अहं नास्मि इति कारणात्। यत: अहं यत्र वर्तते तत्र च अहमिति जानीयादेव। अहमर्थ: विद्यमानस्सन् अज्ञातो न कदापि भवति। **"अहम्"** इत्यत्र जाग्रदवस्थायां स्वप्नासवस्थायां वा अहमस्मि वा न वा इति विषये नास्ति संशय:। परन्तु सुषुप्त्यवस्थायां सैव पदार्थो नास्ति। तत्र किं कारणमिति चेत् तत्र आत्मा तु अस्ति, यत: उत्थित: स्मरति। परन्तु अहमिति तु नोल्लिख्यते। अस्य इदमेव तात्पर्यं भवति यत् आत्मसकाशात् अहमर्थ ईषद् भिन्न:। भिन्न: इत्यनेन एवं न मन्तव्यं यत् तद्भिनापि आत्मा प्रकाशते, अत्यन्तभिन्न: इति न। विवेकमात्रं तत्र करणीयम्। अहमिति पदार्थं आत्मन: सकाशात् विविच्य कुत्रापि प्रकटयितुं न शक्यते। यथा शुक्ति: रूप्यमिति पृथक्कृत्य **"इयं शुक्ति:"**, इदं रजतमिति यथा पृथक् पृथक् प्रदर्शयितुं न शक्यते। तथैव अयमहं पदार्थ: **"अयमात्मा"** इति विविच्य प्रदर्शयितुं न शक्यते, परन्तु बुद्ध्या विवेक्तव्योऽयमंश:। केनापि अहमिति इति एकेन अंशेन मिलित: आत्मा अन्यत्र अनुभूत: अवस्थाद्वये, परन्तु सुषुप्त्यवस्थायाम् तु स: कश्चन अंश:, य आत्मनि तादात्म्येन भासमान आसीत्, स इदानीं नोपलभ्यते। एवञ्च बुद्ध्या विविच्यमाने अहमित्यत्र अंशद्वयं सिद्ध्यति। अत एव पञ्चपादिकारादय: अहमिति तावत् प्रथमोऽध्यास इति निरूपयन्ति। तत: परं अहमित्यध्यासानन्तरमन्ये अध्यासा: तत्र जायन्ते। एवञ्च अयमहं पदार्थ: चिदचिद्ग्रन्थिरूप:। अस्य तु भेदनं न प्रकारान्तरेण सुशकम्, किञ्च उपनिषज्जन्यतत्त्वज्ञानेनैव शक्यम् अत उपनिषदेव शरणीकरणीया। एवञ्च प्रकारान्तरेण यस्मात् अहं पदार्थो विद्यमानं चिदंशं पृथक्कृत्य ज्ञातुं न शक्यते, अत: एव उपनिषदां तत्र सार्थक्यं वर्तते। एतादृशमात्मस्वरूपं केनापि अन्येन प्रमाणेन न ज्ञायते, अत एव इदमौपनिषत्तत्त्वमित्युच्यते **"तं त्वौपनिषदं पुरुषं पृच्छामि**[26]**"** इति। अन्यथा देहेन्द्रियादिभ्यो व्यतिरिक्त आत्मा उपनिषदं अनाश्रित्यापि स्थापयितुं शक्यते। यथैतदन्यै: दार्शनिककारै: क्रियत एव। अत: कीदृशमेतत्तात्मतत्त्वं वर्तते, अस्य प्रकाशनम् उपनिषदेव सम्भवति इति कृत्वा औपनिषदिति शब्द: निरूपचरित:, आत्मनि प्रयुक्त इति अस्माभि: ज्ञायते। एवञ्च अहं पदार्थात् व्यतिरेक: य आत्मा, एतत् ज्ञानार्थमपि सुषुप्त्यवस्थाया: प्रयोजनं विद्यते। एवमवस्थात्रयस्य उपयोग: वर्तत इति शम् ।

२५ छान्दोग्योपनिषत्, ८/११/१
२६ बृहदारण्यकोपनिषत्, ३/९/२६